देवाच समवस्थानं सम्यक् समन्वितावस्थानां भगवदपरोक्षज्ञानेन च पर-मनैष्कर्म्यं परशान्तत्वं परभक्तित्वञ्च । एतत्प्रतिपादनाय न वयं बहुल-प्रयासं स्वीकृतवन्तः, स्वत एवैवं संस्काराद्दूषितहृदये प्रतिभाति । गीतोक्तसाधनसोपानपरम्परा चास्माभिरेवमुपनिबद्धा ;—"शास्त्रेऽस्मिन् सोपानपरम्परया साधकानामुच्चभूमावारोहणं निबद्धम् । तत्र प्रथमं देहात्मनोर्विवेकेन पन्थारम्भः । न ह्यात्मज्ञानं विना साधकत्वमेव सम्भवति । कोऽहमित्यजानतो विषयेन्द्रियसंश्लेषता नामापरिहार्य्या । यदा स दुःखार्त्तो न विषयेषु रमते, तदात्मानुसन्धाने प्रवृत्तिरुदेति । आत्मा देहातिरिक्तो देहविनाशे न तस्य विनाशः ; स तु स्वयमविकारी, विकारस्तु देहधर्म्म इति विचारः साधनस्य प्रथमसोपानम् । देहस्य प्रकृतिजत्वात् प्रकृत्या नित्यसम्बन्धत्वात् आत्मनः प्रकृतेरतीतत्वात् प्रकृतिसम्भूतविषयेन्द्रियक्रियातः स्वस्य स्वातन्त्र्यं पश्यतो दर्शनादिव्यापारेषु तस्य निर्लिप्तभावेन स्थितिः साधनस्य द्वितीयसोपानम् । क्रियमाणानि कर्म्माणि प्रकृतिजैरिन्द्रियैर्न तु स्वयमात्मनेति सङ्गफलत्यागेन कर्म्मण्यकर्म्मदर्शनं निर्लिप्तभावेन स्थितेर्दार्ढ्यायास्मिन् सोपान एव विहितम् । प्रकृतेरात्मनः स्वातन्त्र्यं जानतोऽपि विषयेन्द्रियव्यापारात् सर्व्वथा निर्लिप्तसाधनं न जातु सुकरम्, केवलेन पुरुषकारेण तत्साधनोद्यतानामनेकेषां भूयो भूयः पतनदर्शनात् । अतएव तृतीयसोपाने प्रकृतेरात्मनश्च नियन्तारं सर्व्वान्तर्यामिणं परमपुरुषं ज्ञातुं प्रयतते साधकः । यदा हि तमात्मनः प्रियत्वेन स जानाति, तदा तस्मिन् सर्व्वकर्म्माणि समर्प्य तदाराधनानुरक्तो भवति साधकश्चतुर्थसोपानारूढः । अस्य सोपानस्य परिपाकावस्थायां तदेकशरणत्वमुपतिष्ठते अपरोक्षदृष्टेः स्थिरत्वञ्च" इति । इदमेव हि चरमसोपानमत्र ।

न खलु ब्रह्मोपासनं विना साधनसिद्धिश्चरमसोपानारोहणं वा सम्भवति । तच्चासम्भवमिति प्रतिपादयिता श्रीमता शङ्करेणात्र महान् विरोधः सम्भाव्यते । "न हि ब्रह्मैकत्वविज्ञानेनोन्मथितद्वैतविज्ञानस्य पुनः सम्भवोऽस्ति येनोपासनाविधिशेषत्वेन ब्रह्म प्रतिपद्येत" (वे, सू,

१अ, १पा, ४सू, भा) ; "द्विरूपं हि ब्रह्मावगम्यते, नामरूपविकार-भेदोपाधिविशिष्टं तद्विपरीतञ्च सर्व्वोपाधिवर्ज्जितम् ।......तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्व्वो व्यवहारः ।......एवमेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धञ्च उपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते ।" (वे, सू, १अ, १पा, ११सू, भा) इत्युपाधिसम्बन्धादुपास्यत्वं निरस्तोपाधिसम्बन्धात् ज्ञेयत्वमिति निर्णयात् न जातूपाधिसम्बन्धविरहितं ब्रह्मोपासनविषयमित्यायाति । यदि न तस्य सिद्धान्तान्तरेणेदं विरोधि मतमन्यथाभावमापद्येत, सत्यानुरतस्य तस्य तत्प्रत्युपेक्षाव्याकं हृदयं निरतिशयं खेदयेत । "त्रिविधमिह ब्रह्मण उपासनं विवक्षितम्—प्राणधर्म्मेण, प्रज्ञाधर्म्मेण, स्वधर्म्मेण च ।...तस्मादुभयस्य एव एतदुपाधिद्वयधर्म्मेण स्वधर्म्मेण च एकमुपासनं त्रिविधं विवक्षितम्" (वे, सू, १अ, १पा, ३१सू, भा) इत्यत्र स्वधर्म्मेण ब्रह्मोपासनं वेदान्तसम्मतमिति स्वीकारात् स्वरूपापेक्षुपासनं तस्य मतविरोधीति न वयं वक्तुमुत्सहामहे । "'सत्यं ज्ञानमनन्तं ब्रह्म', 'आनन्दो ब्रह्म' इत्यादिषु स्वरूपानुसन्धानम्" (वे, सू, १अ, १पा, ३१सू, भा) इति श्रीमद्रामानुजः, "अन्तर्बहिः सर्व्वगतत्वेनेत्युपासात्रैविध्यात्" (वे, सू, १अ, १पा, ३१सू, भा) इति श्रीमन्माध्वः, "अतः क्रियाज्ञानविषयरूपो भगवानेवेति प्रतिपाद्य न तावन्मात्रं ततोऽप्यधिक इत्येकोपासनैव विहिता" (वे, सू, १अ, १पा, ३१सू, भा) इति श्रीमद्वल्लभः । सिद्धत्येव स्वरूपानुसन्धानोपासनमिति वादिनां मतैक्यस्थलम्, आचार्य्यस्य तस्मिन्नेव सम्मतिरिति तदेव द्वादशाध्याये विस्तरेणादर्श्यमाभिः । निर्विशेषसविशेषवादैक्यमेवमस्माभिस्तत्राभ्यधायि—"साधने प्रवृत्तस्य प्रथमं सत्तामात्रधारणं निर्विशेषवादस्य, सत्तायां चित्स्वरूपस्य चित्स्वरूपस्य च शिवस्वरूपत्वेन शुद्धस्वरूपत्वेन सुखस्वरूपत्वेन दर्शनं सविशेषवादस्य च मूलम् । ब्रह्मापि सदेकरूपत्वमेव ; साधकमतदृष्टिभेदात् यद्यपि भिन्नत्वेन प्रतिभाति तदेकमेव स्वरूपं, तथापि परब्रह्मणि नास्ति निर्व्विशेषसविशेषवादयोरवकाशः । निर्व्विशेषसविशेषवादिभिर्यदा

सच्चिदानन्दघनं ब्रह्मेति कीर्त्तितं, तदा निष्फल एव निर्व्विशेषसविशेष-विचार:।" इति। स्वरूपाणामेकत्वञ्चैवं निरधारि—"न तु पुन-र्ज्ञानमिदमन्तविशिष्टं भवितुमर्हति, तथा सति ज्ञानस्याज्ञानविमिश्र-त्वमेवायाति। सच्च ज्ञानञ्च न भिन्ने, यदित्युक्ते ज्ञानस्यैव सत्त्वं नान्यस्य, यत: सतो जगदुत्पत्तौ नान्यत्वं सर्व्वस्य ज्ञानक्रियानुस्यूतत्वात्। अनन्त-त्वन्तु सतो ज्ञानस्य च पूर्व्वमेव प्रतिपादितम्। एवं सत्यं ज्ञानमनन्तं न भिन्नस्वरूपमेकमेवेति सिद्धेऽन्येषामपि स्वरूपाणां तदभिन्नत्वमिति साधनं न दुष्करम्। ज्ञानमेव शिवम्, यतो जीवानां प्रयोजनानि जानाति ब्रह्म पूर्णज्ञानत्वात्, तत एवोत्पद्यन्ते तदायोजनानि च पूर्व्व-मेव। अनन्तत्वेन हि तस्य प्रपञ्चातीतत्वमतो न पृथग्युक्तेरावश्यकता। ज्ञाने नाज्ञानस्यास्तित्वमतोऽस्य शुद्धत्वं स्वाभाविकमेव। अविशुद्धत्वं दु:खहेतुरतो विशुद्धत्वेऽस्य स्वाभाविके सुखस्वरूपत्वमिति एकस्यैव चित्स्वरूपस्य भिन्नदृष्ट्या दर्शनेन भिन्नस्वरूपवत्त्वेन प्रतीतिर्न तु स्वरूपत एव भिन्नत्वम्।" इति।

साधनसिद्धावीश्वरप्रसादात् किं वा चरमलभ्यमस्मिन् शास्त्रे निर्दि-ष्टमिति पृच्छायां ब्रह्मभाव इत्युत्तरम्। कोऽयं ब्रह्मभाव:? ब्रह्म-साधर्म्यश्रवणात् (१४।२) ब्रह्मणि निर्वृति: (२।७२,५।२४),ब्रह्मणि स्थिति: (५।१९।२०), ब्रह्मणि प्रवेश: (११।५४,१८।५५), ब्रह्मणि निवास: (१२।८), ब्रह्मसम्पन्नता (१३।३०) इति। ब्रह्मसाधर्म्यं ब्रह्मस्वरूपैक्यमिति निर्व्विवादो राद्धान्त:। तस्मादेव शाश्वतस्थानप्राप्ति: (१८।६२) इति मन्तव्यम्; अपुनरावृत्तिर्ब्रह्मणि स्थितावन्याभिनिवेशाभावात्। तस्मिन् स्थितेरप्राप्तौ विषयसम्बन्धानिवृत्ते: पार्थिवलोकेषु देहसम्बन्ध:, निखिल-विभ्रममपास्य यावन्न सिद्धत्यपुनरावृत्ति:। पापाचारिणां नित्यकाल-व्यापिन्यसद्गति: "तानहं क्षिपत: क्रूरान्" (१६।१९-२०) इत्यादिश्रव-णात् मन्तव्या, दुराचारं परिहाय आत्मन: श्रेय:समाचरणेन तस्यैव (१६।२२) तेषां सद्गतिश्रवणात्, अनुगीतायाञ्च (२६श, २६।२८श्लो) गत्यु-पायप्रदर्शनात्।

यद्यपि पूर्व्वव्याख्यातृभिर्भगवदाज्ञापालनं तदिच्छानुवर्त्तनं चात्मवदीश्वराय कर्म्मार्पणं स्वस्वनिबन्धेषु भूयोभूयोऽवादि, तथापि गीतायां न क्वापि तत्तच्छब्दप्रयोगो दृश्यते। किमतो वक्तव्यं यथाचार्य्यहृदयेऽवर्त्तत, तत्तत्तैरारोपितं व्याख्यातृभिरिति। न केनापि प्रतिवदितुं शक्यं यत्तेन प्रवर्त्तकत्वमीश्वरस्य (१८।६१) स्पष्टवाक्येनाभ्यधायीति। तमनुमन्तेति (१३।२२) निर्द्दिश्य स्वनिर्देशेच्छाज्ञापनं भगवतश्चोक्तवान् सः। ज्ञानादिकं हृत्स्थात्तस्मात् प्रवर्त्तते (१५।१५), स्वयमीश्वरो ज्ञानालोकं विदधाति (१०।११), इत्यपि तेनाभिहितम्। दार्व्वीन स्वमतानुसरणानुरोधो (३।२१-२२) भगवदाज्ञापालने प्ररोचनमेवाभिव्यनक्ति। "मच्चित्तः सर्व्वदुर्गाणि मत्प्रसादात् तरिष्यसि। अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि॥" (१८।५८) इत्यनेन यदेव भगवानन्तर्यामी कर्त्तुमाज्ञापयति तस्यैवानुसरणं श्रेयःसाधकं विपरीते पुनरात्मविनाश इति स्पष्टम्। अस्मिन् गीताशास्त्रे परापरप्रकृतौ अधिष्ठाय स्वाभिप्रायं ज्ञापयतीश्वर इति यद्दृश्यते, तेन साक्षात्सम्बन्धो न विहन्यते परस्याज्ञापयितुरिति सुधीभिर्विभाव्यम्।

कोऽयं गीताशास्त्रस्य वक्ता कोऽयं निबन्धा चेत्यस्योत्तरमदात् श्रीमच्छङ्करः—"स च भगवान् [कृष्णः] ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजोभिः सदा सम्पन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य अजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव जात इव लोकानुग्रहं कुर्व्वन् लक्ष्यते; स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया वैदिकं हि धर्म्मद्वयमर्ज्जुनाय शोकमोहमहोदधौ निमग्नायोपदिदेश गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानश्च धर्म्मः प्रचयं गमिष्यतीति। तं धर्म्मं भगवता यथोपदिष्टं वेदव्यासः सर्व्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध।" इति। अनुगीतायाः प्रामाण्यन्तु तद्वचनेनैव सर्व्वैरनुभूयताम् "तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्यात्यन्तोपरमलक्षणम्, तच्च सर्व्वकर्म्मसन्न्यासपूर्व्वकादात्मज्ञाननिष्ठारूपाद्धर्म्माद्भवति। तम-

र्थमेव गीतार्थधर्ममुद्दिश्य भगवतैवोक्तं 'स हि धर्मः सुपर्य्याप्तो ब्रह्मणः पदवेदने' इत्यनुगीतासु । किञ्चान्यदपि तत्रैवोक्तं 'नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी । यः स्यादेकासने लीनस्तूष्णीं किञ्चिदचिन्तयन् ॥' 'ज्ञानं सन्न्यासलक्षणम्' इति च" इति । तत्रैव भाष्यविवेचने श्रीमद्भिरिदम्—"वक्तृभेदादभिप्रायभेदाशङ्कां वारयति भगवतैवेति । उक्तमनुगीतास्विति सम्बन्धः" इति । नास्माकं हृदये गीताशास्त्रस्य वस्तुरूपनिबन्धे च विषये अनुगीतायाश्च प्रामाण्ये संशयो वर्त्तते । अतोऽर्व्वाचीनजनानां संशयमनुसृत्य विचारकार्य्येऽवतरणाय नास्माकं रुचिरस्ति । भक्तिपथप्रवर्त्तनादिविषये या वितण्डोत्थापिताऽर्व्वाचीनैः, सातिपूर्व्वमेव संस्कारदोषसम्भूता चासत्यप्रतिष्ठेति प्रतिपन्नमस्माकं विचारेण । तदन्यत्र प्रदर्शयितव्यमिति नात्र तदुपन्यास इति शम् ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्योपसंहारः ।

साङ्केतिकाक्षरविवृतिः ।

साङ्केतिकाक्षरम्	ग्रन्थनाम ।
अ, गी,	अनुगीता ।
अनु, प,	अनुशासनपर्व्व ।
अ, प,	अश्वमेधपर्व्व ।
आ, गृ, सू,	आश्वलायनगृह्यसूत्रम् ।
आ, प,	आदिपर्व्व ।
आ, वा, प,	आश्रमवासिकपर्व्व ।
उ, प,	उद्योगपर्व्व ।
ऋ, सं,	ऋक्संहिता ।
ऐ, उ,	ऐतरेयोपनिषत् ।
ऐ, उ, नी, क, धृ,	ऐतरेयोपनिषत् नीलकण्ठधृता ।
काठ,	काठोपनिषत् ।
क, प,	कर्णपर्व्व ।
छा, उ,	छान्दोग्योपनिषत् ।

[illegible] [illegible] ग्रन्थनामसङ्केतः [illegible]।

[illegible] [illegible]। [illegible] [illegible] ग्रन्थनाम।

क, उ, कठोपनिषत्।
तै, उ, तैत्तिरीयोपनिषत्।
तै, ब्रा, तैत्तिरीयब्राह्मणम्।
द, सं, दक्षसंहिता।
नि, निरुक्तम्।
पा, भा, पातञ्जलसूत्रभाष्यम्।
पा, सू, पातञ्जलसूत्रम्।
प्र, उ, प्रश्नोपनिषत्।
ब्र, वै, पु, ब्रह्मवैवर्त्तपुराणम्।
भा, (भाग,) भागवतम्।
म, आ, प, महाभारतादिपर्व्व।
मा, उ, माण्डूक्योपनिषत्।
मा, पु, मार्कण्डेयपुराणम्।
मा,भ,टी, माध्वभाष्यटीका।
मु, उ, मुण्डकोपनिषत्।
मौ, प, मौषलपर्व्व।
यो, च, योगचन्द्रिका।
यो, वा, योगवाशिष्ठम्।
रा, अ, रामायणारण्यकाण्डम्।
रा, उ, रामायणोत्तरकाण्डम्।
ल, वि, ललितविस्तरः।

व, प, वनपर्व्व।
वा,सं,उ,वाजसनेयसंहितोपनिषत्।
वि, पु, विष्णुपुराणम्।
बृ, आ, बृहदारण्यकोपनिषत्।
वे,त,सा, वेदान्ततत्त्वसारः।
वे, सू, वेदान्तसूत्रम्।
वे,सू,भा, वेदान्तसूत्रभाष्यम्।
श,प,ब्रा(श,ब्रा,) शतपथब्राह्मणम्।
श, भा, शङ्करभाष्यम्।
शा, प, शान्तिपर्व्व।
श्वे, उ, श्वेताश्वतरोपनिषत्।
स, प, सभापर्व्व।
स,स,प,स, सर्व्वसंवादिनी परमात्मसन्दर्भः।
सा, सू, सांख्यसूत्रम्।
स्त्री, प, स्त्रीपर्व्व।
ह,भ,र,सि, हरिभक्तिरसामृतसिन्धुः।
ह, वं, हरिवंशः।

भ्रमसंशोधनम् ।

२१पृष्ठम् ।   ५—८ पंक्तयः ।

अत्रापि च न इति भावत ऐक्यम् * ।

---

* उक्तिरेषा निरर्थकास्तथा, संशोध्या पुनरन्यथा—" 'एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः । आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥' इत्यनन्तरोक्ता आसुरान् भावान् परित्यज्य दैवगुणानाचरन् सद्गतिं प्राप्नोतीति विद्धि ।" इति ।

सप्तश्लोकी गीता ।

८।१३ ११।३६ १३।१३ ८।९

१५।१ १५।१५ ९।३४

ओंकारेण प्रवक्ष्यामि साधनं नातिविस्तरम् ।
अन्तराया विहन्यन्ते ओङ्कारस्मरणेन हि ॥

अवसन्नायामतोऽत्र सर्वं परं धीमहीत्यनेनास्य योजना ।

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥

अन्यच्च ।—

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥

शुद्धिपत्रम् ।

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
।/०	१६	तिर्द्धारयितुं	निर्द्धारयितुं
१।/०	१०	संवृत्तानि	सम्प्रवृत्तानि
१।/०	१७	पृधक्कृत्य	पृथक्कृत्य
१॥०	२	धार्विति	धाविति
८	२४	व्यामिश्रेणेव	व्यामिश्रेणेव
१२	१८	न	नः
१४	१	सुवेशाम्	सुशिवाम्
१८	२१	लीकान्तर-	लोकान्तर-
१८	३	लाकाना-	लोकाना-
२१	६	पुण्यलाका	पुण्यलोका
"	२४	नच्छन्ति	गच्छन्ति
२२	१७	इत्युक्तादि विद्यानाम्	इत्युक्तिर्दिविद्यानाम्
२३	"	अयभत्र	अयमत्र
२८	१४	सम्यपश्य	सम्यपश्यति ।
२८	"	कार्त्तत्व-	कार्त्स्न्य-
३२	१७	-दिच्छा पालन-	-दिच्छापालन-
४८	२२	सिद्यति	सिद्ध्यति
५३	३	उमे	उभे
५६	१७	यावदध्यायपरिसमाप्तिं	यावदध्यायपरिसमाप्ति
६०	१	सर्व्व	सर्व्वं
६२	८	अपक्रान्तो	अप्रक्रान्तो
७६	२३	पुंनरूपसंहार-	पुनरुपसंहार-

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
७८	१२	भारतः	भारत
८१	४	मिश्रयुक्त-	मिश्रयुक्त-
८८	१०	चच	चर्च
९४	१२	अविशं	पविशो-
११२	२४	श्रौमच्चदर	श्रौमच्चदर
१२२	१६	उपधावत्	उपाधावत्
१२४	२१	मृत्युर्व्वे-	मृत्यूर्व्वे-
१२७	२७	ल्येनोपख्याप्य	ल्लेनोपख्याप्य
१२९	२२	युबच	युध्वच
१४२	१४	मिथ्याभ्यानं	मिथ्याभ्यानं
१६२	२०	प्रेरयितारश्च	प्रेरितारश्च
”	२१	शुष्टस्तेना-	शुष्टस्तसेना-
१६६	१	कार्त्त्वं	कार्त्तृत्वं
१६७	८	कर्म्मफलश्चेति	कर्म्मफलश्चेति
१८२	२६	-चिंसन् सर्व्व-	-चिंसन्तु सर्व्व-
१८३	१	५।१।१५	८।१।१५
१९५	२	प्रवक्ष्यामि	प्रवक्ष्यामि
२०८	२२	-वशंभ्यावीति	-वश्यभ्यावीति
२१०	१२	प्रलीयमानपि	प्रलीयमानमपि
२१६	६	७६सू	६६सू
२१७	२५	सर्व्वेषामेव	सर्व्वेषामेव
२२५	२४	मायया	मायया
२३१	११	यदव्यमणां	[illegible]
२३४	२६	ययादचित्	यद्यपिचित्
२४१	१५	यदा	यदी
”	२४	कर्म्मारश्च	कर्म्मारश्च

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
२४२	२	प्रारमेश्वरं	परमेश्वरं
,,	२५	-मृतस्य तद्ग्राख्यया	-मृतस्य-तद्ग्राख्यया
२४३	२०	काठ, ५ १५	काठ, ५।१५
२४८	२१	त त्वहोरात्रयुक्तेषु	न त्वहोरात्रयुक्तेषु
२५५	१४	रात्रि पितरः	रात्रिः पितरः
२६६	२०	-वशास्त न	-वशास्ते न
२६७	,,	लाकसंख्यया	लोकसंख्यया
२६८	२५	कोशाद्भि पा	कोशाद्भि पो
२७१	२१	एकत्वन	एकत्वेन
२७२	१२	द्रव्यत्वाविलापे	द्रव्यत्वाविलोपे
२७४	२३	तमसोऽस्त	तमसोऽस्ते
२८१	२५	अन्तकरणग्रहं	अन्तःकरणग्रहं
२८६	६	दृमर्हि	दृमिर्हि
२८८	१५	आत्मति	आत्मेति
,,	२६	यर्व्वाणि	सर्व्वाणि
३००	,,	ालेक	काले
३०४	१३	कल्पः	जल्पः
३०९	२४	तस्याहमीश्वरा	तस्याहमीश्वरो
३१०	१२	सुकृतिना	सुकृतिनो
,,	१५	द्वाश्रयः	द्वाश्रयः
३११	२०	वस्तुजात'	वस्तुजातं
३१२	८	निरुपाधिकं	निरुपाधिकं
३१९	१५	मोच्येत	मोच्येत
३३३	२०	मोचधृत्वा	मोचैर्धृत्वा
३४०	,,	क्षेत्रम्	क्षेत्रम्
३४७	,,	सदिपुरते	सदुच्यते

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
३४८	१९	ब्रह्मान्वय-	ब्रह्मान्वेय-
३६४	१७	हर्षविषाद्शून्यः	हर्षविषादशून्यः
३७२	१९	श्रीमद्द्वैपायनस्य	श्रीमद्द्वैपायनस्य
३७३	८	पापकत्यां	पापकृत्यां
३७८	१४	चित्तभूमैः	चित्तभूमैः
३७९	८	श्रीमद्विष्णुपुर्य्योक्तौ	श्रीमद्विष्णुपुर्य्युक्तौ
३८२	२०	चैत्रसूपतितप्रेरणा-	चैत्रसूपतिप्रेरणा-
३८५	२१	त्यादिकस्वरूपम्	त्वादिकस्वरूपम्
३९३	१	त्ववमजानन्तः	त्वेवमजानन्तः
३९५	१८	चास्मदधिष्ठित-	चास्मदधिष्ठित-
३९९	१०	चत्ताभिनिवेशं	चेत्ताभिनिवेशं
४०३	५	साधम्यं	साधर्म्यं
४०९	६	संश्लषयति	संश्लेषयति
४१३	८	शङ्कपत	सङ्क्षेपत
४१५	७	शरीरं	"शरीरं
४२४	२५	मस्यति	मस्येति
४३६	९	मेदोऽस्ति	भेदोऽस्ति
,,	१२	मेददर्शनात्	भेददर्शनात्
४४६	१८	ग्रामुरः	ग्रासुरः
४५१	१८	मोगी	भोगी
,,	२३	लप्स्ये	लप्स्ये
४५३	१९	नास्त्ववकाशो	नास्त्यवकाशो
४६८	८	साधुरयं	साधुरयं
४७६	२५	सत्वस्य	सत्यस्य .
४८५	[illegible]	[illegible]	सत्त्वेन
४९०	७	मोक्तेति	भोक्तेति



पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
४९९	१	-रागद्वेषत:	-रागद्वेषत:
५००	११	मद्भक्तिरूपतिष्ठति	मद्भक्तिरुपतिष्ठते
५०१	७	रक्षित:	याचित:
५०२	२४	अयथावत्	अयथावद्
५०३	१०	दु:खानन्तश्च	दु:खान्तश्च
५०४	९	परिपक्वावस्थायां	परिपक्वावस्थायां
५०५	२६	सर्व्वे	सर्व्वे
५१०	१०	इति श्रीमद्रामानुज: ;	इति ;
५१२	७	तस्यमेव	तस्यैव
५१५	८	द्विचन्द्रादे-	द्विचन्द्रादे-
५१८	५	मवति	भवति
५२१	९	च्छङ्कर:	च्छङ्कर:
५२३	१८	स्वरूपतो	स्वरूपतो
५२५	१९	-ब्रह्मपाप्ति-	-ब्रह्मप्राप्ति-
५३४	११	त्रिभिगुणमयै-	त्रिभिर्गुणमयै-
५४१	१५	तद्धेतुर्गूणवैषम्य'	तद्धेतुर्गुणवैषम्य'
५५१	१	स्यादभिन्नास्त	स्यादभिन्नास्ते
५६४	२	शरीरादिसम्बन्ध-	शरीरादिसम्बन्ध-

संशोधनेऽस्मदायस्य याऽविशुद्धिर्न दृश्यता।
संशोध्या सा बुधैः क्षाम्या प्रमादगणनापरैः ॥